# साहित्यं समाजस्य दर्पणमिति कथनस्यार्थविचार:

**राधावल्लभशर्मा**

साहित्यं समाजस्य दर्पणमिति धीमतां कश्चन वचनविन्यास: । कथनमिदं प्राक्कालादेव नितरां प्रसिद्धिमवाप । तदनुगुणमेव काचित् विचारसरणि: प्रवृत्ता यद् साहित्यं समाजस्य दर्पणमस्ति न वा । वस्तुतोऽयं विचार: नातिसरल: नातिगभीरश्च वक्तुं पारयामो वयम् । तर्हि किं नाम साहित्यम् ? वस्तुत: शब्दार्थयो: सहभाव एव साहित्यम् । प्रसङ्गेऽस्मिन् आचार्यराधावल्लभत्रिपाठी निगदति अभिनवकाव्यालङ्कारसूत्रे – [१]**समुपसर्गपूर्वकाद् धाधातो: निष्पद्यते साहित्यशब्द: । तद्यथा ''लुम्पेदवश्यम: कृत्ये तुङ्काममनसोरपि'' इति नियमाद् हिततततयो: प्राक् समित्युपसर्गस्य मकारो लुप्यति । तेन सम् हित इति संहितायां प्रापातायां सन्ततशब्दो यथा सततत्वेन तथा संहित इति शब्द एव सहितत्वेन परिणमते । संहितत्वं नाम शब्दार्थयोरावापोद्वापसमन्वितं सम्यगाधानम् । संहितत्वं सहितत्वं वा साहित्यम् ।**

आचार्यकुन्तको वक्रोक्तिजीवितग्रन्थे साहित्यपरिभाषाविषये स्वाभिमतमेवं प्रकटीचकार –

**[२]मार्गानुगुण्यसुभगो माधुर्यादिगुणोदय: ।**

**अलङ्करणविन्यासो वक्रतातिशयान्वित: ॥**

**वृत्त्यौचित्यमनोहारि रसानां परिपोषणम् ।**

**स्पर्धया विद्यते यत्र यथास्वमुभयोरपि ॥**

**सा काप्यवस्थितिस्तद्विदानन्दस्पन्दसुन्दरा**

**पदादिवाक्यपरिस्पन्दसार: साहित्यमुच्यते ॥**

अर्थात् शब्दार्थयो: वाच्यवाचकलक्षणनित्यसंबन्धरूपसहभाव एव साहित्यमिति कथनमात्रं न अपि तु अन्यूनानतिरिक्तत्वमनोहारिणी परस्परस्पर्धित्वरमणीया काचिदपूर्वा विन्यासविच्छित्तिरेव साहित्यम् यत्र

---

[1] अभिनवकाव्यालङ्कारसूत्रम् पृष्ठसंख्या २७

[2] अभिनवकाव्यालङ्कारसूत्रम् पृष्ठसंख्या २९,३०

द्वयोरपि शब्दार्थयोः अपकर्षोत्कर्षः न स्यात् । शब्दार्थयोः एतादृशं परस्परं साम्यमेव साहित्यमुच्यते । वस्तुतः साहित्यं

समाजस्य दर्पणं न भवितुमर्हति यतः साहित्ये समाजस्य सर्वाः घटनाः सर्वाः क्रियाश्च अन्तर्भवन्ति । दर्पणे केवलं बाह्यं रूपं यथावत् प्रतिबिम्बितं भवति । साहित्ये तावत् समाजस्य सूक्ष्ममाभ्यन्तरञ्च रूपमपि चित्रायते कविः । अतः साहित्यं कथं समाजस्य दर्पणम् । अत्र समादधाति त्रिपाठिराधावल्लभः – यदि तु साहित्यं लोकस्य आधिभौतिकाधिदैविकाध्यात्मिकानां त्रयाणामेव दर्पणमित्याशयेन तस्यादर्शत्वं निरूप्यते तदा न दोषः । यद्यमेवमुच्यते – आधिभौतिकाधिदैविकाध्यात्मिकाश्च त्रिविधो हि लोकः । लोको नाम समाजः । स च समाजः साहित्ये प्रतिफलति तदा साहित्यं समाजस्य दर्पणमिति कथनस्यार्थविचारो नितान्तं साधु प्रतीयते । अनेन हि साहित्यस्य त्रैकालिकत्वं स्वतः सिद्धम् ।

वस्तुतः आधिभौतिकाधिदैविकाध्यात्मिकानां तत्त्वानां विकासः समुल्लासश्च जीवनम् । तच्च जीवनं समेषामेव सचेतनानां भवति । मनुष्यस्य, तिरश्चां समूहस्य, राष्ट्रस्य, स्थावरजङ्गमानां समेषां भवत्येव जीवनम् । तच्च जीवनं महाकविभिः निरूप्यते साहित्यशास्त्रेषु । एतत्सर्वं लक्ष्यीकृत्य अभिनवभरताचार्यः त्रिपाठिराधावल्लभः परामृशति निजग्रन्थे –

**[३]साहित्ये जीवनं सर्वं सर्वाङ्गीणं नवं नवम् ।**

**प्रतिबिम्बत्वमायाति समुल्लसति वर्धते ॥**

**अद्भुतः प्रतिबिम्बोऽयं बिम्बमेव विभावयन् ।**

**संस्कुर्वन् जीवनं तस्मिन् समवेतो नवायते ॥**

**जीवने चास्ति साहित्यं साहित्ये जीवनं तथा ।**

**परस्परकृता सिद्धिरनयोः सम्प्रवर्तते ॥**

वस्तुतः साहित्यं समाजस्य दर्पणमिति विचारचर्चायां प्रधानभूतो भवति कवेः साहित्यकारस्य वा अभिप्रायः । इह दर्पणमित्यनेन कथनेन साधारणदर्पणमित्यर्थो नावगन्तव्यः अस्माभिः प्रत्युत परमार्थतः सत्यमेव अर्थः ग्राह्यः । तस्मिन् दर्पणे केवलं सत्यस्य प्रतिबिम्बमेव प्रतिफलति न तु मिथ्यात्वस्य प्रातिभासिकस्य व्यावहारिकस्य वा । अतः साहित्यं समाजस्य दर्पणमिति कथनस्यार्थविचारः समीचीनः प्रतिभातीति । अन्ते –

---

[3] अभिनवकाव्यालङ्कारसूत्रम् पृष्ठसंख्या १८

**दर्पणमस्ति साहित्यं समाजस्य यथा तथा ।**

**साहित्ये भासते सर्वं समाजे यत्प्रवर्तते ॥**

**हितेन सहितं साहित्यं शब्दार्थौ इह शोभते ।**

**कुरुते प्रातिनिध्यं हि लोकस्येति सुधीवचः ॥**

**समेषामपि शास्त्राणां सारभूतमिदं खलु ।**

**अतो लोकहितार्थाय रक्षणीयं सदा मुदा ॥**[४]

सन्दर्भग्रन्थसूचिः-

१. अभिनवकाव्यालङ्कारसूत्रम् , सम्पादकः - डा. रमाकान्तपाण्डेयः, जगदीश संस्कृत पुस्तकालय, जयपुर, २००९ ।

[4] लेखकेन विरचितम्